# Gopichandana Upanishad

# ગોપીચન્દનોપનિષત્

## Document Information

Text title : Gopichandana Upanishad

File name : gopIchandanopaniShat.itx

Category : upanishhat

Location : doc_upanishhat

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description/comments : Atharva Veda upanishad

Latest update : March 21, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# ગોપીચન્દનોપનિષત્

ગોપિકાસ્વાન્તસંલીનં શ્રીકૃષ્ણાખ્યં પરં મહઃ ।
બ્રહ્માનન્દસ્વરૂપં તત્સ્વમાત્રમિતિ ચિન્તયે ॥ ૧॥

ૐ ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવાઃ ।
ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ ।  સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ ॥ ગોપી કા નામ । સંરક્ષણી ।
કુતઃ સંરક્ષણી । લોકસ્ય નરકાન્મૃત્યોર્ભયાચ્ચ
સંરક્ષણી । ચન્દનં તુષ્ટિકારણં ચ । કિં તુષ્ટિકારણમ્ ।
બ્રહ્માનન્દકારણમ્ । ય એવંવિદ્વાનેતદાખ્યાપયેદ્ય એતચ્ચ
ધારયેદ્ગોપીચન્દનમૃત્તિકાયા નિરુક્ત્યા ધારણમાત્રેણ ચ
બ્રહ્મલોકે મહીયતે બ્રહ્મલોકે મહીયત ઇતિ ॥ ૧॥

ગોપ્યો નામ વિષ્ણુપત્ન્યઃ સ્યુસ્તાસાં ચન્દનમાહ્લાદનમ્ ।
કશ્ચાહ્લાદઃ । એષ બ્રહ્માનન્દરૂપઃ । કાશ્ચ વિષ્ણુપત્ન્યો
ગોપ્યો નામ । યા આત્મના બ્રહ્માનન્દૈકરૂપં કૃષ્ણાખ્યં
પરં ધામાજયંસ્તા જગત્સૃષ્ટિસ્થિત્યન્તકારિણ્યઃ
પ્રકૃતિમહદહમાદ્યા મહામાયાઃ । કશ્ચ વિષ્ણુઃ ।
પરં બ્રહ્મૈવ વિષ્ણુઃ । કશ્ચાહ્લાદઃ । ગોપીચન્દનસંસક્ત-
માનુષાણાં પાપસંહરણાચ્છુદ્ધાન્તકરણાનાં
બ્રહ્મજ્ઞાનપ્રાપ્તિશ્ચ । ય એવં વેદેત્યુપનિષત્ ॥ ૨॥

ગોપીત્યગ્ર ઉચ્યતાં ચન્દનં તુ તતઃ પશ્ચાત્ । ગોપીત્યક્ષરદ્વયં
ચન્દનં તુ ત્રિયક્ષરં તસ્માદક્ષરપઞ્ચકમ્ । ય એવંવિદ્વાન્

ગોપીચન્દનં ધારયેદક્ષયં પદમાપ્નોતિ પઞ્ચત્વં ન સ પશ્યતિ
તતોઽમૃતત્વમશ્નુતે તતોઽમૃતમશ્નુત ઇતિ ॥ ૩॥

અથ માયાશબલિતં બ્રહ્માસીત્તતશ્ચ મહદાદ્યા બ્રહ્મણો
મહામાયાસમ્મિલિતાત્ । પઞ્ચભૂતેષુ ગન્ધવતીયં પૃથિવ્યાસીત્ ।
પૃથિવ્યાશ્ચ વૈભવાદ્વર્ણભેદાઃ । પીતવર્ણા મૃદો જાયન્તે
લોકાનુગ્રહાર્થમ્ । માયાસહિતબ્રહ્મસમ્ભોગવશાદસ્ય ચન્દનસ્ય
વૈભવમ્ । ય એવંવિદ્વાન્યતિહસ્તે દદ્યાદનુપપ્લવઃ સર્વમાયુરેતિ ।
તતઃ પ્રાજાપત્યં રાયસ્પોષં ગૌષ્પત્યં ચ । ય એતદ્રહસ્યં
સાયં પ્રાતર્ધ્યાયેદહોરાત્રકૃતં પાપં નાશયતિ મૃતો
મોક્ષમશ્નુત ઇતિ ॥ ૪॥

ગોપીચન્દનપઙ્કેન લલાટં યસ્તુ લેપયેત્ ।
એકદણ્ડી ત્રિદણ્ડી વા સ વૈ મોક્ષં સમશ્નુતે ॥ ૧॥

ગોપીચન્દનલિપ્તાઙ્ગો યં યં પશ્યતિ ચક્ષુષા ।
તં તં પૂતં વિજાનીયાદ્રાજભિઃ સત્કૃતો ભવેત્ ॥ ૨॥

બ્રહ્મહન્તા કૃતઘ્નશ્ચ ગોઘ્નશ્ચ ગુરુ તલ્પગઃ ।
તેષાં પાપાનિ નશ્યન્તિ ગોપીચન્દનધારણાત્ ॥ ૩॥

ગોપીચન્દનલિપ્તાઙ્ગો મ્રિયતે યત્ર કુત્રચિત્ ।
અભિવ્યાપ્યાયતો ભૂત્વા દેવેન્દ્રપદમશ્નુતે ॥ ૪॥

ગોપીચન્દનલિપ્તાઙ્ગં પુરુષં ય ઉપાસતે ।
એવં બ્રહ્માદયો દેવાસ્તન્મુખાસ્તાનુપાસતે ॥ ૫॥

ગોપીચન્દનલિપ્તાઙ્ગઃ પુરુષો યેન પૂજ્યતે ।
વિષ્ણુપૂજિતભૂતિત્વાદ્વિષ્ણુલોકે મહીયતે ॥ ૬॥

સદાચારઃ શુભાકલ્પો મિતાહારો જિતેન્દ્રિયઃ ।
ગોપીચન્દનલિપ્તાઙ્ગઃ સાક્ષાદ્વિષ્ણુમયો ભવેત્ ॥ ૭॥

ગોપીચન્દનલિપ્તાઙ્ગો વ્રતં યસ્તુ સમાચરેત્ ।
તતઃ કોટિગુણં પુણ્યમિત્યેવં મુનિરબ્રવીત્ ॥ ૮॥

ગોપીચન્દનલિપ્તાઙ્ગૈર્જપદાનાદિ યત્કૃતમ્ ।
ન્યૂનં સમ્પૂર્ણતાં યાતિ વિધાનેન વિશેષતઃ ॥ ૯॥

ગોપીચન્દનમાયુષ્યં બલારોગ્યવિવર્ધનમ્ ।
કામદં મોક્ષદં ચૈવ ઇત્યેવં મુનયોઽબ્રુવન્ ॥ ૧૦॥

અગ્નિષ્ટોમસહસ્રાણિ વાજપેય શતાનિ ચ ।
તેષાં પુણ્યમવાપ્નોતિ ગોપીચન્દનધારણાત્ ॥ ૧૧॥

ગોપીચન્દનદાનસ્ય નાશ્વમેધકૃતઃ ફલમ્ ।
ન ગઙ્ગયા સમં તીર્થં ન શુદ્ધિર્ગોપિચન્દનાત્ ॥ ૧૨॥

બહુમાઽત્ર કિમુક્તેન ગોપીચન્દનમણ્ડનમ્ ।
ન તત્તુલ્યં ભવેલ્લોકે નાત્ર કાર્યા વિચારણા ॥ ૧૩॥

ચન્દનં ચાપિ ગોપીનાં કેલિકુઙ્કુમસમ્ભવમ્ ।
મણ્ડનાત્પાવનં નૃણાં ભુક્તિમુક્તિફલપ્રદમ્ ॥ ૧૪॥

કૃષ્ણગોપીરતોદ્ભૂતં પાપઘ્નં ગોપિચનદનમ્ ।
તત્પ્રસાદાત્સર્વદૈવ ચતુર્વર્ગફલપ્રદમ્ ।
તિલમાત્રપ્રદાનેન કાઞ્ચનાદ્રિસમં ફલમ્ ॥ ૧૫॥

કુઙ્કુમં કૃષ્ણગોપીનાં જલક્રીડાસુ સમ્ભૃતમ્ ।
ગોપીચન્દનમિત્યુક્તં દ્વારવત્યાં સુરેશ્વરૈઃ ॥ ૧૬॥

કૃષ્ણગોપીજલક્રીડાકુઙ્કુમં ચન્દનૈર્યુતમ્ ।
તિલમાત્રં પ્રદાયેદં પુનાત્યા દશમં કુલમ્ ॥ ૧૭॥

ગોપીચન્દનખણ્ડં તુ ચક્રાકારં સુલક્ષણમ્ ।
વિષ્ણુરૂપમિદં પુણ્યં પાવનં પાતવર્ણકઃ ॥ ૧૮॥

આપો વા અગ્ર આસન્ । તત્ર પ્રજાપતિર્વાયુર્ભૂત્વાઽશ્રામ્યતેદં સૃજેયમિતિ ।
સ તપોઽતપ્યત । તત ઓઙ્કારમપશ્યત્ । તતો વ્યાહૃતીસ્તતો ગાયત્રીમ્ ।
ગાયત્ર્યા વેદાસ્તૈરિદમસૃજત । ધૂમમાર્ગવિસ્તૃતં હિ
વેદાર્થમભિસન્ધાય ચતુર્દશ લોકાનસૃજત । તત ઉપનિષદઃ
શ્રુતય આવિર્બભૂવુઃ । અર્ચિમાર્ગવિસ્તૃતં વેદાર્થમભિસન્ધાય
સર્વાન્વેદાસરહસ્યોપનિષદઙ્ગાન્બ્રહ્મલોકે સ્થાપયામાસ ।
તાશ્ચોપાદિશદ્વૈવસ્વતેઽન્તરે સગુણં બ્રહ્મ ચિદ્ઘનાનન્દૈકરૂપં
પુરુષોત્તમરૂપેણ મથુરાયાં વસુદેવસદ્મન્યાવિર્ભવિષ્યતિ ।
તત્ર ભવત્યઃ સર્વલોકોત્કૃષ્ટસૌન્દર્યક્રીડાભોગા ગોપિકાસ્વરૂપૈઃ
પરબ્રહ્માનન્દૈકરૂપં કૃષ્ણં ભજિષ્યથ ।

તત્ર શ્લોકાઃ —ઇતિ બ્રહ્મવરં લબ્ધ્વા શ્રુતયો બ્રહ્મશ્લોકગાઃ ।
કૃષ્ણમારાધયામાસુર્ગોકુલે ધર્મસઙ્કુલે ॥ ૧૯॥

શ્રીકૃષ્ણાખ્યં પરં બ્રહ્મ ગોપિકાઃ શ્રુતયોઽભવન્ ।
એતત્સમ્ભોગસમ્ભૂતં ચન્દનં ગોપીચન્દનં ચન્દનં ગોપીચન્દનમિત્યુપનિષત્ ॥ ૨૦॥

ૐ ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવાઃ ।
ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇત્યાથર્વણીયા ગોપીચન્દનોપનિષત્સમાપ્તા ॥

Encoded and proofread by Sunder Hattangadi

*Gopichandana Upanishad*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*